

# શ્રી મલ્લિકાર્જુન મંગળાશાસનમ્-ઉમાકાંતાય કાંતાય કામિતાર્થ

https://www.chalisa.online

|| શ્રી મલ્લિકાર્જુન મંગળાશાસનમ્ ||
ઉમાકાંતાય કાંતાય કામિતાર્થ પ્રદાયિને
શ્રીગિરીશાય દેવાય મલ્લિનાથાય મંગળમ્ ॥
સર્વમંગળ રૂપાય શ્રી નગેંદ્ર નિવાસિને
ગંગાધરાય નાથાય શ્રીગિરીશાય મંગળમ્ ॥
સત્યાનંદ સ્વરૂપાય નિત્યાનંદ વિધાયને
સ્તુત્યાય શ્રુતિગમ્યાય શ્રીગિરીશાય મંગળમ્ ॥
મુક્તિપ્રદાય મુખ્યાય ભક્તાનુગ્રહકારિણે
સુંદરેશાય સૌમ્યાય શ્રીગિરીશાય મંગળમ્ ॥
શ્રીશૈલે શિખરેશ્વરં ગણપતિં શ્રી હટકેશં
પુનસ્સારંગેશ્વર બિંદુતીર્થમમલં ઘંટાર્ક સિદ્ધેશ્વરમ્ ।
ગંગાં શ્રી ભ્રમરાંબિકાં ગિરિસુતામારામવીરેશ્વરં
શંખંચક્ર વરાહતીર્થમનિશં શ્રીશૈલનાથં ભજે ॥
હસ્તેકુરંગં ગિરિમધ્યરંગં શૃંગારિતાંગં ગિરિજાનુષંગમ્
મૂર્દેંદુગંગં મદનાંગ ભંગં શ્રીશૈલલિંગં શિરસા નમામિ ॥